श्री कमला स्तोत्रं 2

श्री कमला स्तोत्रं 2

श्रीशंकर उवाच |
अथातः संप्रवक्ष्यामि लक्ष्मीस्तोत्रमनुत्तमं |
पठनाच्छ्रवणाद्यस्य नरो मोक्षमवाप्नुयात् || 1 ||

गुह्याद्गुह्यतरं पुण्यं सर्वदेवनमस्कृतं |
सर्वमंत्रमयं साक्षाच्छृणु पर्वतनंदिनि || 2 ||

अनंतरूपिणी लक्ष्मीरपारगुणसागरी |
अणिमादिसिद्धिदात्री शिरसा प्रणमाम्यहं || 3 ||

आपदुद्धारिणी त्वं हि आद्या शक्तिः शुभा परा |
आद्या आनंददात्री च शिरसा प्रणमाम्यहं || 4 ||

इंदुमुखी इष्टदात्री इष्टमंत्रस्वरूपिणी |
इच्छामयी जगन्मातः शिरसा प्रणमाम्यहं || 5 ||

उमा उमापतेस्त्वंतु ह्युत्कंठाकुलनाशिनी |
उर्वीश्वरी जगन्मातर्लक्ष्मि देवि नमोऽस्तु ते || 6 ||

ऐरावतपतिपूज्या ऐश्वर्याणां प्रदायिनी |
औदार्यगुणसंपन्ना लक्ष्मि देवि नमोऽस्तु ते || 7 ||

कृष्णवक्षःस्थिता देवि कलिकल्मषनाशिनी |
कृष्णचित्तहरा कर्त्री शिरसा प्रणमाम्यहं || 8 ||

कंदर्पदमना देवि कल्याणी कमलानना |
करुणार्णवसंपूर्णा शिरसा प्रणमाम्यहं || 9 ||

खंजनाक्षी खगनासा देवि खेदविनाशिनी |
खंजरीटगतिश्चैव शिरसा प्रणमाम्यहं || 10 ||

गोविंदवल्लभा देवी गंधर्वकुलपावनी |
गोलोकवासिनी मातः शिरसा प्रणमाम्यहं || 11 ||

ज्ञानदा गुणदा देवि गुणाध्यक्षा गुणाकरी |
गंधपुष्पधरा मातः शिरसा प्रणमाम्यहं || 12 ||

घनश्यामप्रिया देवि घोरसंसारतारिणी |
घोरपापहरा चैव शिरसा प्रणमाम्यहं || 13 ||

चतुर्वेदमयी चिंत्या चित्तचैतन्यदायिनी |
चतुराननपूज्या च शिरसा प्रणमाम्यहं || 14 ||

चैतन्यरूपिणी देवि चंद्रकोटिसमप्रभा |
चंद्रार्कनखरज्योतिर्लक्ष्मि देवि नमाम्यहं || 15 ||

चपला चतुराध्यक्षी चरमे गतिदायिनी |
चराचरेश्वरी लक्ष्मि शिरसा प्रणमाम्यहं || 16 ||

छत्रचामरयुक्ता च छलचातुर्यनाशिनी |
छिद्रौघहारिणी मातः शिरसा प्रणमाम्यहं || 17 ||

जगन्माता जगत्कर्त्री जगदाधाररूपिणी |
जयप्रदा जानकी च शिरसा प्रणमाम्यहं || 18 ||

जानकीशप्रिया त्वं हि जनकोत्सवदायिनी |
जीवात्मनां च त्वं मातः शिरसा प्रणमाम्यहं || 19 ||

झिंजीरवस्वना देवि झंझावातनिवारिणी |
झर्झरप्रियवाद्या च शिरसा प्रणमाम्यहं || 20 ||

टंककदायिनी त्वं हि त्वं च ठक्काररूपिणी | [अर्थप्रदायिनीं]
ढक्कादिवाद्यप्रणया डंफवाद्यविनोदिनी |
डमरुप्रणया मातः शिरसा प्रणमाम्यहं || 21 ||

तप्तकांचनवर्णाभा त्रैलोक्यलोकतारिणी |
त्रिलोकजननी लक्ष्मि शिरसा प्रणमाम्यहं || 22 ||

त्रैलोक्यसुंदरी त्वं हि तापत्रयनिवारिणी |
त्रिगुणधारिणी मातः शिरसा प्रणमाम्यहं || 23 ||

त्रैलोक्यमंगळा त्वं हि तीर्थमूलपदद्वया |
त्रिकालज्ञा त्राणकर्त्री शिरसा प्रणमाम्यहं || 24 ||

दुर्गतिनाशिनी त्वं हि दारिद्र्यापद्विनाशिनी |
द्वारकावासिनी मातः शिरसा प्रणमाम्यहं || 25 ||

देवतानां दुराराध्या दुःखशोकविनाशिनी |
दिव्याभरणभूषांगी शिरसा प्रणमाम्यहं || 26 ||

दामोदरप्रिया त्वं हि दिव्ययोगप्रदर्शिनी |
दयामयी दयाध्यक्षी शिरसा प्रणमाम्यहं || 27 ||

ध्यानातीता धराध्यक्षा धनधान्यप्रदायिनी |
धर्मदा धैर्यदा मातः शिरसा प्रणमाम्यहं || 28 ||

नवगोरोचना गौरी नंदनंदनगेहिनी |
नवयौवनचार्वंगी शिरसा प्रणमाम्यहं || 29 ||

नानारत्नादिभूषाढ्या नानारत्नप्रदायिनी |
नितंबिनी नलिनाक्षी लक्ष्मि देवि नमोऽस्तु ते || 30 ||

निधुवनप्रेमानंदा निराश्रयगतिप्रदा |
निर्विकारा नित्यरूपा लक्ष्मि देवि नमोऽस्तु ते || 31 ||

पूर्णानंदमयी त्वं हि पूर्णब्रह्मसनातनी |
पराशक्तिः पराभक्तिर्लक्ष्मि देवि नमोऽस्तु ते || 32 ||

पूर्णचंद्रमुखी त्वं हि परानंदप्रदायिनी |
परमार्थप्रदा लक्ष्मि शिरसा प्रणमाम्यहं || 33 ||

पुंडरीकाक्षिणी त्वं हि पुंडरीकाक्षगेहिनी |
पद्मरागधरा त्वं हि शिरसा प्रणमाम्यहं || 34 ||

पद्मा पद्मासना त्वं हि पद्ममालाविधारिणी |
प्रणवरूपिणी मातः शिरसा प्रणमाम्यहं || 35 ||

फुल्लेंदुवदना त्वं हि फणिवेणि विमोहिनी |
फणिशायिप्रिया मातः शिरसा प्रणमाम्यहं || 36 ||

विश्वकर्त्री विश्वभर्त्री विश्वत्रात्री विश्वेश्वरी |
विश्वाराध्या विश्वबाह्या लक्ष्मि देवि नमोऽस्तु ते || 37 ||

विष्णुप्रिया विष्णुशक्तिर्बीजमंत्रस्वरूपिणी |
वरदा वाक्यसिद्धा च शिरसा प्रणमाम्यहं || 38 ||

वेणुवाद्यप्रिया त्वं हि वंशीवाद्यविनोदिनी |
विद्युद्गौरी महादेवि लक्ष्मि देवि नमोऽस्तु ते || 39 ||

भुक्तिमुक्तिप्रदा त्वं हि भक्तानुग्रहकारिणी |
भवार्णवत्राणकर्त्री लक्ष्मि देवि नमोऽस्तु ते || 40 ||

भक्तप्रिया भागीरथी भक्तमंगळदायिनी |
भयदाऽभयदात्री च लक्ष्मि देवि नमोऽस्तु ते || 41 ||

मनोऽभीष्टप्रदा त्वं हि महामोहविनाशिनी |
मोक्षदा मानदात्री च लक्ष्मि देवि नमोऽस्तु ते || 42 ||

महाधन्या महामान्या माधवमनमोहिनी |
मुखराप्राणहंत्री च लक्ष्मि देवि नमोऽस्तु ते || 43 ||

यौवनपूर्णसौंदर्या योगमाया योगेश्वरी |
युग्मश्रीफलवृक्षा च लक्ष्मि देवि नमोऽस्तु ते || 44 ||

युग्मांगदविभूषाढ्या युवतीनां शिरोमणिः |
यशोदासुतपत्नी च लक्ष्मि देवि नमोऽस्तु ते || 45 ||

रूपयौवनसंपन्ना रत्नालंकारधारिणी |
राकेंदुकोटिसौंदर्या लक्ष्मि देवि नमोऽस्तु ते || 46 ||

रमा रामा रामपत्नी राजराजेश्वरी तथा |
राज्यदा राज्यहंत्री च लक्ष्मि देवि नमोऽस्तु ते || 47 ||

लीलालावण्यसंपन्ना लोकानुग्रहकारिणी |
ललना प्रीतिदात्री च लक्ष्मि देवि नमोऽस्तु ते || 48 ||

विद्याधरी तथा विद्या वसुदा त्वं हि वंदिता |
विंध्याचलवासिनी च लक्ष्मि देवि नमोऽस्तु ते || 49 ||

शुभ्रकांचनगौरांगी शंखकंकणधारिणी |
शुभदा शीलसंपन्ना लक्ष्मि देवि नमोऽस्तु ते || 50 ||

षट्चक्रभेदिनी त्वं हि षडैश्वर्यप्रदायिनी |
षोडशी वयसा त्वं हि लक्ष्मि देवि नमोऽस्तु ते || 51 ||

सदानंदमयी त्वं हि सर्वसंपत्तिदायिनी |
संसारतारिणी देवि शिरसा प्रणमाम्यहं || 52 ||

सुकेशी सुखदा देवि सुंदरी सुमनोरमा |
सुरेश्वरी सिद्धिदात्री शिरसा प्रणमाम्यहं || 53 ||

सर्वसंकटहंत्री त्वं सत्यसत्त्वगुणान्विता |
सीतापतिप्रिया देवि शिरसा प्रणमाम्यहं || 54 ||

हेमांगिनी हास्यमुखी हरिचित्तविमोहिनी |
हरिपादप्रिया देवि शिरसा प्रणमाम्यहं || 55 ||

क्षेमंकरी क्षमादात्री क्षौमवासविधारिणी |
क्षीणमध्या च क्षेत्रांगी लक्ष्मि देवि नमोऽस्तु ते || 56 ||

श्रीशंकर उवाच |
अकारादि क्षकारांतं लक्ष्मीदेव्याः स्तवं शुभं |
पठितव्यं प्रयत्नेन त्रिसंध्यं च दिने दिने || 57 ||

पूजनीया प्रयत्नेन कमला करुणामयी |
वांछाकल्पलता साक्षाद्भुक्तिमुक्तिप्रदायिनी || 58 ||

इदं स्तोत्रं पठेद्यस्तु शृणुयाच्छ्रावयेदपि |
इष्टसिद्धिर्भवेत्तस्य सत्यं सत्यं हि पार्वति || 59 ||

इदं स्तोत्रं महापुण्यं यः पठेद्भक्तिसंयुतः |
तं च दृष्ट्वा भवेन्मूको वादी सत्यं न संशयः || 60 ||

शृणुयाच्छ्रावयेद्यस्तु पठेद्वा पाठयेदपि |
राजानो वशमायांति तं दृष्ट्वा गिरिनंदिनि || 61 ||

तं दृष्ट्वा दुष्टसंघाश्च पलायंते दिशो दश |
भूतप्रेतग्रहा यक्षा राक्षसाः पन्नगादयः |
विद्रवंति भयार्ता वै स्तोत्रस्यापि च कीर्तनात् || 62 ||

सुराश्च असुराश्चैव गंधर्वाः किन्नरादयः |
प्रणमंति सदा भक्त्या तं दृष्ट्वा पाठकं मुदा || 63 ||

धनार्थी लभते चार्थं पुत्रार्थी च सुतं लभेत् |
राज्यार्थी लभते राज्यं स्तवराजस्य कीर्तनात् || 64 ||

ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः |
महापापोपपापं च तरंति स्तवकीर्तनात् || 65 ||

गद्यपद्यमयी वाणी मुखात्तस्य प्रजायते |
अष्टसिद्धिमवाप्नोति लक्ष्मीस्तोत्रस्य कीर्तनात् || 66 ||

वंध्या चापि लभेत् पुत्रं गर्भिणी प्रसवेत्सुतं |
पठनात् स्मरणात् सत्यं वच्मि ते गिरिनंदिनि || 67 ||

भूर्जपत्रे समालिख्य रोचनाकुंकुमेन तु |
भक्त्या संपूजयेद्यस्तु गंधपुष्पाक्षतैस्तथा || 68 ||

धारयेद्दक्षिणे बाहौ पुरुषः सिद्धिकांक्षया |
योषिद्वामभुजे धृत्वा सर्वसौख्यमयी भवेत् || 69 ||

विषं निर्विषतां याति अग्निर्याति च शीततां |
शत्रवो मित्रतां यांति स्तवस्यास्य प्रसादतः || 70 ||

बहुना किमिहोक्तेन स्तवस्यास्य प्रसादतः |
वैकुंठे च वसेन्नित्यं सत्यं वच्मि सुरेश्वरि || 71 ||

इति रुद्रयामले शिवगौरीसंवादे अकारादिक्षकारांतवर्णग्रथितं श्री कमला स्तवः |